## MASTER OF ARTS EXAMINATION, 2023

(2nd Year, 2nd Semester)

## SANSKRIT

## COURSE – XVI / E

**[ Select Post Aśokan (Pre - Gupta) and Gupta Inscriptions ]**

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

१. अधोलिखितेषु प्रश्नेषु **पञ्च** सुरगिरा देवनागरीलिप्या समाधेयाः। 1×5=5

क) वासिष्ठीपुत्रपुलुमावेः ऊनविंशराज्यवर्षाङ्कितनासिकलेख्यानुसारं गौतम्या बलश्रिया केभ्यः कीदृशं दानं कृतम्?

ख) अक्षयनीवीमर्यादा का?

ग) समुद्रगुप्तस्य एलाहाबादस्तम्भाभिलेखे येषामायुधानामुल्लेखः वर्तते तेषु कस्यचित् चतुष्टयस्य नामानि प्रदीयन्ताम्।

घ) वासिष्ठीपुत्रपुलुमावेः ऊनविंशराज्यवर्षाङ्कितनासिकलेख्ये केषां कुलपर्वतानामुल्लेखः वर्तते?

ङ) पट्टवायश्रेण्या मान्दासोराभिलेखानुसारं कस्यां तिथौ भानुमतो गृहं संस्कारितम्? अस्मिन् लेख्ये उल्लिखितं विश्ववर्म्मणो विशेषणद्वयं लेखनीयम्।

च) समुद्रगुप्तस्य एलाहाबादस्तम्भाभिलेखानुसारं व्याघ्रराजः कस्य स्थानस्य नृपतिरासीत्? तस्य स्थानस्याधुनिकभौगोलिकस्थितिः प्रदीयताम्।





छ) *सवेषु देशेषु विधाय गोप्तॄन्*– इति स्कन्दगुप्तस्य जुनागडाभिलेखे उल्लिखितस्य गोप्तृशब्दस्य कोऽर्थः? स्कन्दगुप्तस्य संभाव्यः कालः लेखनीयः।

२. अधोलिखितेषु प्रश्नेषु **पञ्च** समाधेयाः। 5×5=25

क) वासिष्ठीपुत्रपुलुमावेः ऊनविंशराज्यवर्षाङ्कितनासिकलेख्यमाश्रित्य गौतमीपुत्रसातकर्णेः कीर्तयो वर्णनीयाः। 5

ख) पट्टवायश्रेण्याः मान्दासोराभिलेखानुसारं लाटदेशाद् दशपुरमागत्य पट्टवायैः का वृत्तयो गृहीताः? तेषामभिवासनस्य तथा वृत्तिपरिवर्तनस्य च कारणविषये ऐतिहासिकानां कीदृशानि मतानि उपलभ्यन्ते? 1.5+3.5

ग) स्कन्दगुप्तस्य जुनागडाभिलेखमाश्रित्य सुदर्शनसेतोः ध्वंसकारणं जीर्णोद्धारप्रक्रिया चालोच्येताम्। 2+3

घ) १२४-गुप्ताब्दे १२८-गुप्ताब्दे च प्रचारितं दामोदरपुरताम्रशासन-द्वयमाश्रित्य तदानीनन्तनभूमिस्वत्वान्तरविधिः प्राशासनिक-विन्यासश्च आलोचनीयौ। 2.5+2.5

ङ) मेहरौलिस्तम्भलेखस्य चन्द्रराजस्य परिचयविषये योग्यतमं तत्त्वमालोच्यताम्। विष्णुपदगिरेः भौगोलिकस्थितिविषये चर्चा करणीया। 3+2

च) समुद्रगुप्तस्य एलाहाबादस्तम्भलेखानुसारं गुप्तनृपतिना समुद्रगुप्तेन आर्यावर्तस्य के राजानो विजिताः? तेषु यथेच्छं चतुष्टयस्य संभाव्यः परिचयः प्रदेयः। आटविकविजये तेन कीदृशी नीतिरनुसृता? 1.5+2.5+1

छ) सप्रसङ्गं व्याख्या कार्या। 2.5+2.5

विनिवतितचातूवणसंकरस;
यः पित्राभिहितो निरीक्ष्य निखिलां पाह्येवमुर्वीमिति।